

केरलपाठावलिः

# अध्यापकपुस्तकम्

## संस्कृतम्

नवमी कक्ष्या

संस्कृतविद्यालयानां कृते।।

KERALA READER

# TEACHER TEXT

## SANSKRIT

STANDARD

IX

For Sanskrit Schools Only

Government of Kerala
Department of General Education

2024

State Council of Educational Research and Training (SCERT), Kerala

DRAFT

केरलपाठावलिः

# अध्यापकपुस्तकम्

## संस्कृतम्

## नवमी कक्ष्या

संस्कृतविद्यालयानां कृते।।

KERALA READER

# TEACHER TEXT

## SANSKRIT

STANDARD

## IX

For Sanskrit Schools Only

DRAFT

Government of Kerala
Department of General Education

2024
State Council of Educational Research and Training (SCERT), Kerala

Draft Copy



## भूमिका

प्रवर्तनाधिष्ठिता छात्रकेन्द्रिता च पाठ्यपद्धतिः एव इदानीं प्रचाल्यमाना अस्ति। छात्राणां सर्वतोमुखविकासः एवास्याः पद्धत्याः लक्ष्यम्। छात्राणां स्तरानुसारं विविधैः व्यवहाररूपैः सम्पुष्टं भवति नवमीकक्ष्यायाः संस्कृतविद्यालयीय छात्राणां कृते आयोजितं पाठ्यपुस्तकम्। प्रवर्तनानां सरलतया अनुशीलनाय हस्तपुस्तकस्थम् आमुखं, प्रवेशकप्रवर्तनं, पठनप्रवर्तनानि, अनुबन्धः, सूचनाग्रन्थाः चेति क्रमः एकैकस्मिन् पाठे स्वीकृतः। एतेषां प्रवर्तनानाम् आविष्करणाय अध्यापकस्य सहायकं भविष्यतीदं हस्तपुस्तकम्। पाठपुस्तके निर्दिष्टानां सर्वेषां प्रवर्तनानाम् आयोजनक्रमः, प्रवर्तनानां मूल्यनिर्णयसूचकाः, किमधिगतम् इति स्वयंमूल्यनिर्णयस्य अङ्कनाय निर्देशाः च अस्मिन् हस्तपुस्तके प्रदत्ताः सन्ति। इतोऽप्यधिकानि पठनप्रवर्तनानि कक्ष्यायां परिशीलयितुम् अध्यापकस्य स्वातन्त्र्यमस्ति।

लिखितानां प्रवर्तनानां परिशीलनेन छात्राः भाषाप्रयोगे समर्थाः भवेयुः। निरन्तरमूल्यनिर्णयस्य सफलीकरणाय अध्यापकः यतताम्। तदर्थं हस्तपुस्तकमिदम् अध्यापकानामुपकारकं भवेत्। अपि च संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

डा. जयप्रकाश् आर्. के.
निर्देशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

DRAFT

Draft Copy

# Handbook Development Committee
# Sanskrit – IX – Oriental Schools

## Advisor

**V. Madhavan Pillai**, Associate Professor in Sanskrit (Rtd)

## Chairperson

**Dr. Anand Dilip Raj,** Associate Professor in Sanskrit (Rtd)

## Expert

**Dr. T. Kerala Sreemathi**, Senior Research Officer SCERT (Rtd)

## Participants

**Lekha. K,** HST, SNVSHS, Thrikkaruva, Kollam.

**Resmi. G. Pillai,** HST, KV Sanskrit HSS, Muthukulam, Alappuzha.

**Dr. Sabarees.M,** HST, H.S.S Mundur, Palakkad.

**Sajikumar. A.V,** HSST Jr. Sanskrit, GHSS East Hill, Kozhikkode.

**Sreejith. S**. Chandran, Rev.Dr. CTEM St. Thomas VHSS, Pannivizha,Adoor, Pathanamthitta.

**Vidhyalakshmi. M**, HST Sanskrit, GBHSS Tirur, Malappuram.

## Academic Co-ordinator

**Deepa N. Kumar**

Research Officer (Hindi), SCERT Kerala.

DRAFT

---

**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद् - केरलम्।**

**State Council of Educational Research and Training (SCERT)**

**Kerala**

**2024**

Draft Copy


## वार्षिकासूत्रणम्

| एककम् | पाठः | मासः | कालांशः |
|---|---|---|---|
| **साहितीलयः** | जागरूको भव। | जूण्-जूलाय् | 15 |
| | वसन्तागमः। | जूलाय्-ओगस्ट् | 09 |
| **भावदीप्तिः** | सुवर्णशाकटिकम्। | सेप्टम्पर्-ओक्टोबर् | 16 |
| | काव्यामृतम्। | नवम्बर् -डिसम्बर् | 10 |
| **रामणीयकम्** | शोणनदवर्णनम्। | डिसम्बर्-जनुवरि फेब्रुवरि | 14 |
| | चमत्कृतिः। | फेब्रुवरि | 6 |
| | परिहारबोधनाय मूल्यनिर्णयाय च | मार्च् - सम्पूर्ण अक्कादमिक वर्षं। | 10 |
| | **आहत्य** | | 80 |

DRAFT

Draft Copy

# एककम् १
# साहितीलयः

## आमुखम्

अस्मिन्नेकके **'जागरूको भव'** इति कथापाठः **'वसन्तागमः'** इति काव्यपाठः च आयोजितौ वर्तते। कथापठनाय पञ्चादशकालांशाः काव्यपठनाय नवकालांशाः च दत्तौ स्तः। पठनप्रवर्तनानाम् आसूत्रणस्य विस्तृतं रूपम् आगामि पुटे दत्तमस्ति। प्रत्येकं पाठस्य कृते पाठसम्बन्धिन्यः प्राथमिकवस्तुताः, पठनलक्ष्याणि, पठनप्रवर्तनानाम् आयोजनं, प्रवर्तनानां विशदीकरणं, लिखितमातृकाः, अनुबन्धः, सूचितग्रन्थानां पट्टिका च सन्निविष्टाः स्युः। एककस्य अन्ते एककानुसारी मूल्यनिर्णयाय साहाय्यकानि कानिचित् प्रश्नरूपाणि च दत्तानि भवन्ति।

DRAFT

Draft Copy



# पाठः १ जागरूको भव।

| | | |
|---|---|---|
| एककम् | - | १ |
| पाठसंख्या | - | १ |
| पाठस्य नाम | - | जागरूको भव। |
| व्यवहाररूपम् | - | कथा। |
| कालांशः | - | १५ |
| आशयः | - | प्रकृतिः। |
| उपाशयः | - | प्रकृतिदुरन्तः। |
| आशयाः/धारणाः | - | महाभारतस्य शान्तिपर्वणि अन्तर्भूतं राजधर्मानुशासनम् एव अत्र विषयः। तस्मिन् आपद्धर्मानुशासनं शकुलोपाख्यानम् (मत्स्यत्रयकथा)अत्र वर्णितम्। |
| मूल्यानि/ मनोभावाः | - | आपदि स्वरक्षा कर्तव्या। |

पठनलक्ष्यम्

आशयपरम् /भाषापरम्।

- पाठस्य सम्यक् पठनाय नूतनपदानां चयनाय अर्थलेखनाय च सामर्थ्यसम्पादनम्।
- संश्लिष्टपदानां विवेचनाय विश्लेषणाय च सामर्थ्यसम्पादनम्।
- समस्तपदानां विवेचनाय विग्रहवाक्यलेखनाय च सामर्थ्यसम्पादनम्।
- पाठं पठित्वा कथाकथनाय सामर्थ्यसम्पादनम्।
- कथायाः पौर्वापर्यघटनावगमनाय क्रमीकरणाय च सामर्थ्यसम्पादनम्।

DRAFT

Draft Copy

- समानपदार्थावगमनाय सामर्थ्योत्पादनम्।
- कथाविस्तारणाय सामर्थ्यसम्पादनम्।
- सचित्रकथानिर्माणाय / वीडियोसञ्चयाय /कथासम्पुटनिर्माणाय च सामर्थ्यसम्पादनम् (ICT)।
- सूत्रार्थानाम् उदाहरणानां च लेखनाय सामर्थ्यसम्पादनम्।
- सूत्रार्थविचारस्पर्धाचालनाय आशयं स्वांशीकृत्य टिप्पणीलेखनाय च सामर्थ्यसम्पादनम्।

पठनोपकरणानि - पाठपुस्तकं, हस्तपुस्तकं, सान्द्रमुद्रिका, ध्वनिमुद्रिका, ICT इत्यादयः।

## पठनप्रवर्त्तनानाम् आसूत्रणम्

| क्रमसंख्या | प्रवर्तनानि | प्रतीक्षितकालांशः |
|---|---|---|
| 1. | आमुखप्रवर्तनम् , नूतनपदचयनम् अर्थलेखनं च। | १ |
| 2. | सन्धिविश्लेषणम्। | १ |
| 3. | विग्रहवाक्यलेखनम्। | १ |
| 4. | कथाकथनम्। | १ |
| 5. | कथास्तम्भक्रमीकरणम्। | १ |
| 6. | समानार्थपदचयनम्। | १ |
| 7. | कथायाः विस्तारणम्। | १ |
| 8. | सूत्रार्थम् -उदाहरणानां लेखनं च। | ३ |
| 9. | सूत्रार्थविचारस्पर्धा टिप्पणीलेखनं च। | ४ |
| 10. | विशेषप्रवर्तनम्। | १ |
| | **आहत्य** | **१५** |

DRAFT

Draft Copy



## पाठस्य आमुखं पाठप्रवेशकप्रवर्तनं च।

"अध्यापिका कुशलप्रश्नानन्तरं साहितीलयः इति प्रथमैककस्य आमुखं प्रति छात्राणां श्रद्धां नयति। आशयमधिकृत्य चर्चां करोति। छात्राणाम् अभिप्रायान् क्रोडीकरोत्यध्यापिका। ततः पाठप्रवेशे दत्तस्य संभाषणांशस्य वाचनाय निर्दिशति। वाचनानन्तरं द्वित्रान् छात्रान् आशयं वक्तुं प्रेरयति। अध्यापिका क्रोडीकृत्य आशयं वदति।

अनन्तरं महाभारतमधिकृत्य छात्राणां पूर्वज्ञानं परिशोधयति। तदनन्तरम् अध्यापिका आमुखं पठति, विशदयति च।

"महाभारतं " कथानां भण्डागारः इति प्रसिद्धः खलु? भगवतः वेदव्यासस्य सर्वशास्त्रपारङ्गतत्वं दीर्घदर्शितां च अत्र द्रष्टुं शक्यते। एताः कथाः प्रायोगिकजीवने अत्यन्तोपकारिकाः च भवन्ति। तादृशीम् एकां कथा अस्माकं पाठपुस्तके पश्यामः।

### प्रक्रियाविशदीकरणम्।

**प्रवर्तनम् - १ नूतनपदचयनम् अर्थविवेचनं च।**

**उद्देश्यम् -**पाठस्य सम्यक् पठनाय नूतनपदानां चयनाय अर्थलेखनाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापिका छात्रान् सङ्घान् करोति। अनन्तरं पाठभागं पठित्वा नूतनपदानां चयनाय निर्दिशति। सङ्घे चर्चां कृत्वा पाठभागस्थानां नूतनपदानाम् अर्थान् निरीक्ष्य अर्थलेखनाय निर्दिशति। अनन्तरं सङ्घात् एकः इति क्रमेण कक्ष्यायामवतारयति। वाचने लेखने च जातानि स्खालित्यानि अध्यापिका संशोधयति। अनन्तरं छात्राः परस्परं विनिमाय टिप्पणीपुस्तकस्य संशोधनाय निर्दिशति। अध्यापिका टिप्पणीपुस्तकस्य संशोधनं सम्यक् कृतमिति निर्धारयति। अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयं च करोति।

**मूल्यनिर्णयसूचकाः -**

१. चर्चायां भागभागित्वम्।
२. अर्थावगमनम्।
३. टिप्पणीपुस्तके लेखनम्।

अन्ते 'किमधिगतम् ' इत्यत्र अङ्कनाय निर्दिशति।

DRAFT

Draft Copy

**प्रवर्तनम् - २** **संश्लिष्टपदचयनं लेखनं च।**

**उद्देश्यम् -** संश्लिष्टपदानां विवेचनाय विश्लेषणाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** उचितरीत्या अध्यापिका छात्रान् सङ्घान् करोति। छात्राः सङ्घे चर्चां कृत्वा पाठभागात् संश्लिष्टपदानि चित्वा लिखन्ति। अनन्तरं पदच्छेदं निरीक्ष्य लेखनाय निर्दिशति। सङ्घात् एकः इति क्रमेण कक्ष्यायामवतारयति। अध्यापिका वाचने लेखने च जातानि स्खालित्यानि परिहृत्य श्यामफलके लिखति। अनन्तरं छात्राः परस्परं टिप्पणीपुस्तकस्य संशोधनाय निर्दिशति। संशोधनानि सम्यक् कृतमिति अध्यापिका निरीक्ष्य निर्धारयति। अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयं च करोति।

**मूल्यनिर्णयसूचकाः -**

१. चर्चायां भागभागित्वम्।  २. आशयावगमनम्।

३. उचितया रीत्या टिप्पणीपुस्तके लेखनम्।

अनन्तरं 'किमधिगतम्' इत्यत्र अङ्कनाय निर्दिशति।

**प्रवर्तनम् - ३** **विग्रहपदचयनं लेखनं च।**

**उद्देश्यम् -** समस्तपदानां विवेचनाय विग्रहवाक्यलेखनाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापिका समस्तपदानि विग्रहवाक्यानि च चार्टपत्रे/ICT द्वारा प्रदर्शयति। ततः छात्राः मातृकानुसारं विग्रहपदानि पाठभागात् चित्वा टिप्पणिपुस्तके लिखन्ति। लेखनावसरे छात्रैः अनुभूयमानान् क्लेशान् अध्यापिका परिहरति। ततः छात्राः कक्ष्यायामवतारयन्ति। छात्राः लिखितपदानां संशोधनं परस्परं कुर्वन्ति। अन्ते अध्यापिका छात्राणां टिप्पणिपुस्तकं निरीक्ष्य संशोधनं सम्यक् कृतमिति निर्धारयति। अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयं च करोति।

**मूल्यनिर्णयसूचकाः -**

१. चर्चायां भागभागित्वम्।  २. आशयावगमनम्।

३. टिप्पणीपुस्तके लेखनम्।

अनन्तरं 'किमधिगतम्' इत्यत्र अङ्कनं कर्तुं छात्रान् प्रेरयति।

DRAFT

Draft Copy


**प्रवर्तनम् - ४** **काक्वनुसारं भावानुसारं च कथाकथनम्।**

**उद्देश्यम् -** पाठं पठित्वा कथाकथनाय सामर्थ्यसम्पादनम्।

**प्रक्रिया -** एकवारं छात्राः कथां पूर्णतया शृण्वन्तु । तदर्थम् अध्यापिका काक्वनुसारं भावानुसारं च कथां पठति। सान्द्रमुद्रिकायाः उपयोगमपि कर्तुं शक्यते। अनन्तरं सङ्घे स्थित्वा कथायाः परिशीलनाय अवसरं ददातु। सङ्घेषु स्थित्वा अध्यापिकया उचितसाहाय्यं करणीयम्। सङ्घात् एकः इति क्रमेण कक्ष्यायाम् अवतारयतु। अवतारणसमये सान्द्रमुद्रणमपि करोतु। एकैकः अपि गृहं गत्वा कथायाः शब्दमुद्रणं कृत्वा समयानुसारं कक्ष्यायां श्रावयतु। अध्यापिका अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयं च करोतु।

**मूल्यनिर्णयसूचकानि -**

१. चर्चायां भागभागित्वम्। २. आशयावगतिः।

३. काक्वनुसारं भावानुसारं च कथाकथनम्।

अनन्तरं 'किमधिगतम् ' इत्यत्र अङ्कनं कर्तुं छात्रान् निर्दिशति।

**प्रवर्तनम् - ५** **कथास्तम्भानां क्रमीकरणम्।**

**उद्देश्यम् -** कथायाः पौर्वापर्यघटनावगमनाय क्रमीकरणाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापिका कथागतिमनुसृत्य कांश्चन प्रश्नान् पृच्छति। छात्राः उत्तरं वदन्ति। एतादृशरूपेण पाठभागस्य आशयः पूर्णतया तैः उच्यते। तदनन्तरं प्रश्नानाम् उत्तराणि च प्रक्रियापुस्तिकायां लिखन्तु।

प्रश्नाः -

१) जलाधारम् अवलोक्य जालिकाः किमवदन्?

२) अनागतविधाता किमकथयत्?

३) प्रत्युत्पन्नमतिः किमब्रवीत्?

४) मृत इव वर्तमानः प्रत्युत्पन्नमतिः किमकरोत्?

५) दीर्घसूत्री कुत्र बद्धः अभवत्?

DRAFT

Draft Copy

अनन्तरम् अध्यापिका छात्रान् सङ्घान् कृत्वा सङ्घे चर्चित्वा कथास्तम्भानां क्रमीकरणाय निर्दशति। छात्रः क्रमीकरणं कृत्वा टिप्पणीपुस्तके लिखतु। सङ्घात् एकः इति क्रमेण कक्ष्यायामवतारयतु। अध्यापिका अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयं च करोतु।

**मूल्यनिर्णयसूचकानि -**

१. चर्चायां भागभागित्वम्।   २. टिप्पणीपुस्तके लेखनम्।

३. कथायाः पौर्वापर्यक्रमपालनम्।

अन्ते अध्यापिका 'किमधिगतम्' इत्यत्र अङ्कनं कर्तुं छात्रान् निर्दिशति।

**प्रवर्तनम् - ६ समानार्थपदचयनम्।**

**उद्देश्यम् -** समानपदार्थावगमनाय सामर्थ्योत्पादनम्।

**प्रक्रिया -** सङ्घे स्थित्वा पाठपुस्तकं, कोशम्, अनुबन्धं च पठित्वा समानार्थपदानां चयनाय अध्यापिका छात्रान् निर्दिशति। पदानि चित्वा स्वस्वटिप्पणीपुस्तकेषु लिखतु। कक्ष्यायामवतारयतु। अध्यापिका स्खालित्यानि परिहरतु। परस्परं विनिमाय संशोधनाय छात्रान् निर्दिशतु। छात्राणां संशोधनम् अध्यापिका निरीक्षतु।

**मातृका -**

| पदम् | | समानपदानि |
|---|---|---|
| मत्स्यः | - | झषः, मीनः |
| मित्रम् | - | सहचारी, सुहृत् |
| कैवर्तः | - | जालिकः, धीवरः |
| जलाशयः | - | जलाधारः, जलस्थायः |

अध्यापिका अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयं च करोतु।

**मूल्यनिर्णयसूचकानि -**

१. चर्चायां भागभागित्वम्।   २. टिप्पणीपुस्तके लेखनम्।

३. पदानाम् अवगमनम्।

अनन्तरं 'किमधिगतम्' इत्यत्र अङ्कनं करोतु।

DRAFT

Draft Copy



## प्रवर्तनम् - ७ कथायाः विस्तारणम् (विशेषप्रवर्तनम्)।

**उद्देश्यम् -** कथाविस्तारणाय सामर्थ्यसम्पादनम्।

**प्रक्रिया -** पाठभागं शकुलोपाख्यानं च पठित्वा कथान्त्यस्य विस्तारणाय अध्यापिका छात्रान् निर्दिशति। छात्राः सङ्घे स्थित्वा चर्चां करोति। अध्यापिका उचितं साहाय्यं करोति। छात्राः लिखित्वा अवतारयति। अध्यापिका स्खालित्यानि परिहरति। परिष्कृत्य टिप्पणीपुस्तके लेखनाय निर्दिशति। अध्यापिका छात्राणां टिप्पणीपुस्तकानि निरीक्ष्य संशोधनं करोतु। अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयं च करोतु।

**मूल्यनिर्णयसूचकानि -**

१. चर्चायां भागभागित्वम्।
२. टिप्पणीपुस्तके लेखनम्।
३. कक्ष्यायाम् अवतारणम्।

अन्ते 'किमधिगतम् ' इत्यत्र अङ्कनं कर्तुं अध्यापिका छात्रान् निर्दिशति।

**मातृका -**

अन्येद्युः प्रभाते मत्स्यबन्धाः जलस्थायं समन्ततः नालिकां (सुषिराणि) निर्माय जलं निम्नेषु प्रदेशेषु निस्त्रावयामासुः। ततः ते प्रसृततोयात् जलाशयात् विविधैरुपायैः मत्स्यान् बबन्धुः। यदा ते रज्जुभिः मत्स्यान् बद्धुं (बन्धितुं) आरभत तदा प्रत्युत्पन्नमतिः एतेषामन्तरं प्रविश्य बद्धा इव अवर्तत। स्रुततोयस्य जलस्थानस्य विलोडनावसरे दीर्घसूत्री अपरैः मत्स्यैः सह बन्धनं अगच्छत्। यदा कैवर्त्तः ग्रथितान् मत्स्यान् विपुले जले प्रक्षालयितुमारब्धः तदा संप्रतिपत्तिमान् झटित्येव रज्जुं मुक्त्वा विपुले जले अकूर्दत।

DRAFT

## प्रवर्तनम् -८ विशेषप्रवर्तनम्।

**उद्देश्यम् -** सचित्रकथानिर्माणाय / वीडियोसञ्चयाय /कथासम्पुटनिर्माणाय च सामर्थ्यसम्पादनम्। ।

**प्रक्रिया -** अध्यापिका 'अधोनिर्दिष्टेषु एकम् ऐच्छिकरूपेण स्वीकरोतु' इति प्रवर्तनं विशदीकृत्य छात्राणाम् अभिरुच्यनुसारं कर्तुं स्वातन्त्र्यं ददाति। प्रवर्तनस्य पूर्तीकरणाय

अवश्यं साहाय्यमपि ददाति। छात्राः गृहपाठरूपेण प्रवर्तनानि कृत्वा कक्ष्यायाम् अवतारयतु। अध्यापिका अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचकानि -**

१. ) सचित्रकथानिर्माणम् -

- चित्राणां चयनं क्रमीकरणं च।
- संभाषणलेखनम्।
- कक्ष्यायामवतारणम्।

२.) वीडियो सञ्चयः

- कथायाः चयनम्।
- चित्राणाम् आकर्षकता।
- कक्ष्यायाम् अवतारणम्।

३) कथासम्पुटनिर्माणम्

- कथायाः चयनम्।
- सम्पुटनिर्माणम्।
- कक्ष्यायाम् अवतारणम्।

अनन्तरं 'किमधिगतम् ' इत्यत्र अङ्कनं कर्तुं निर्दिशतु।

**प्रवर्तनम् -९ सूत्रार्थानाम् उदाहरणानां च लेखनम् ।**

**उद्देश्यम् -** सूत्रार्थानाम् उदाहरणानां च लेखनाय सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापिका व्याकरणविषये छात्राणां पूर्वज्ञानं शोधयित्वा पुटसंख्या ११(TB) मध्ये दत्तं व्याकरणकार्यं प्रति छात्राणां श्रद्धां नयति।

अच् सन्धिः - 'अच्' इति किम्?
'अच् 'प्रत्याहारे केषां वर्णानामन्तर्भावः?
प्रत्याहाराणां निर्माणं कथम्?

इत्यादि प्रश्नान् पृच्छति। उत्तराणि विशदयति च। अनन्तरं प्रतिसङ्गं पुस्तके दत्तम् उदाहरणं प्रदर्श्य तेषां विशेषतां वक्तुं प्रेरयति।

उदाहरणम् - चेति - च + इति। छात्राणां प्रतिवचनानि श्रुत्वा स्खालित्यानि परिहृत्य

DRAFT

Draft Copy


विशदयति। अनन्तरं सूत्रं सूत्रवृत्तिं च बोधयति। उदाहरणान्तराणि च दत्वा निरीक्षणाय वदति। अध्यापिका निरीक्षणानां संशोधनं करोति, विस्तारयति च। अनन्तरं सङ्घे चर्चित्वा सूत्रार्थस्य उदाहरणानां च लेखनाय निर्दिशति। लिखितानि सङ्घात् एकः इति क्रमेण कक्ष्यायामवतारयतु। अध्यापिका स्खालित्यानि परिहरतु। छात्राणां टिप्पणीपुस्तकं च संशोधयतु। अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचकानि -**

१. चर्चायां भागभागित्वम्। २. टिप्पणीपुस्तके लेखनम्।

३. कक्ष्यायाम् अवतारणम्।

अनन्तरं 'किमधिगतम् ' इत्यत्र अङ्कनं कर्तुं निर्दिशतु।

## प्रवर्तनम् -१० सूत्रार्थविचारस्पर्धा टिप्पणीलेखनं च।

**उद्देश्यम् -** सूत्रार्थविचारस्पर्धाचालनाय आशयं स्वांशीकृत्य टिप्पणीलेखनाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापिका हस्तपुस्तकस्य साहाय्येन उदाहरणात् सूत्रम् इति नियममनुसृत्य उदाहरणानि सूत्राणि च परिचाययति। छात्राः सङ्घे स्थित्वा विशकलनं कृत्वा अध्यापिकायाः निर्देशानुसारं टिप्पणीं लिखति। अध्यापिका तत्तदवसरेषु उचितं साहाय्यमपि करोति। अनन्तरं छात्रान् द्विसङ्घान् कृत्वा विचारस्पर्धायै प्रेरयति। छात्राः परस्परं प्रश्नान् पृष्ट्वा सूत्रार्थं विशदयितुं प्रभवन्ति। अध्यापिका अधोदत्तसूचकान्याधारीकृत्य मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचकानि -**

१. चर्चायां भागभागित्वम्। २. टिप्पणीपुस्तके लेखनम्।

३. सूत्राणामुदाहरणानां च अवगमनम्।

अनन्तरं 'किमधिगतम् ' इत्यत्र अङ्कनं कर्तुं निर्दिशतु।

DRAFT

Draft Copy

## सूत्राणि - अच् सन्धिः।

**उरण् रपरः। (१ /१ /५१)**

ऋकारस्य स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। ऋकारस्य स्थाने गुणे अर्। ऋकारस्य स्थाने वृद्धिः आर्।

वर्षर्तुः - वर्षा + ऋतुः ( आ + ऋ – आर्)

टिप्पणि - उः अण् रपरः इति पदच्छेदः। उः इत्यस्य ऋकारस्येत्यर्थः।

**अन्तादिवच्च। (६ /१ /८५)**

योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवच्च स्यात्। शिवेहि।

अव आ +इहि इत्यत्र आद्गुणः इति जायमानो गुणः एकारः पूर्वस्य आकारस्य परस्य इकारस्य च स्थाने जातः। अयमेकादेशः एकारः पूर्वस्यान्तवत्स्यादिति आकारत्वेन आङ्त्वेन गृह्यते। एवमत्र शिव + एहि इति स्थिते 'ओमाङोश्च' इति अकारादाङि परे पररूपमेकादेशः। शिवेहि इति रूपम्। एवम् अव+एहि - अवेहि।

"अवेहि मां किङ्करमष्टमूर्तेः " इति कालिदासः।

टिप्पणिः - अन्तादिवत् च इति पदच्छेदः। अन्तादिभ्यां तुल्यः आद्यन्तवत् इति विग्रहः।

**ओमाङोश्च। (६ /१ /९५)** ओमि आङि चात्परे पररूपमेकादेशः स्यात्।

कृष्णायों नमः - कृष्णाय + ओं + नमः।

उदा - शिवायों नमः - शिवाय + ओं + नमः।

शिवेहि - शिव + एहि।

शिव + आ + इहि। (अत्र एकारः पूर्वान्तवत् भावेन आङ्)

अवेहि - अव + एहि

टिप्पणिः - ओमाङोः च इति पदच्छेदः। अवर्णाद् ओमि (ओं शब्दे) आङि (आ इत्युपसर्गे) च परे पररूपमेकादेशः स्यात्।

DRAFT

Draft Copy


**ईदूदेद् द्विवचनं प्रगृह्यम्। (१ /१ /११)** ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात्।

हरी एतौ - हरी + एतौ।

विष्णू इमौ - विष्णू + इमौ।

उदा - गङ्गे अमू - गङ्गे + अमू।

पचेते इमौ - पचेते + इमौ।

उभे अस्त्रे - उभे + अस्त्रे।

टिप्पणिः - ईदूदेत् द्विवचनं प्रगृह्यम् इति पदच्छेदः।

ईदन्तम् ऊदन्तम् एदन्तम् च द्विवचनं प्रगृह्यम्। ततः अचि परे प्रकृतिभावः।

**प्लुतप्रगृह्या अचि नित्यम्। (६ /१ /१२५)**

प्लुताः प्रगृह्याः च अचि परे नित्यं प्रकृत्या स्युः।

**अदसो मात्। (१ /१ /१२)**

अदस् शब्दावयवात् मकारात् परौ ईदूतौ प्रगृह्यौ स्तः।

अमी ईशाः - अमी + ईशाः।

उदा - रामकृष्णावमू आसाते - रामकृष्णावमू + आसाते।

देवाः अमी आसते - देवाः + अमी + आसते।

बालकौ अमू आगच्छतः - बालकौ + अमू + आगच्छतः।

टिप्पणिः - अदसः मात् इति पदच्छेदः। अदस् शब्दावयवात् मकारात्परौ ईदूतौ प्रगृह्यौ स्तः।

DRAFT

Draft Copy

# अनुबन्धः

1. **കൊടുങ്ങല്ലൂർ കുഞ്ഞിക്കുട്ടൻ തമ്പുരാന്റെ പദ്യരൂപത്തിലുള്ള മത്സ്യത്രയകഥയുടെ ഭാഗം.**

ദീർഘസൂത്രകഥ

സംഭവിക്കാവുന്ന ആപത്തു തടുക്കാനും സംഭവിച്ചാൽ രക്ഷപ്പെടാനും കഴിവുള്ളവർ സുഖിക്കുമെന്നും ദീർഘസൂത്രൻ നശിക്കുമെന്നും കാണിക്കാൻ മൂന്ന് മത്സ്യങ്ങളുടെ കഥ പറയുന്നു.

ഭീഷ്മൻ പറഞ്ഞു.

വരാവതു തടുപ്പോനും വന്നാൽക്കൈകൊണ്ടുവോനുമെ
രണ്ടുപേരും സുഖിച്ചീടും ദീർഘസൂത്രൻ നശിച്ചിടും.
ഇതിന്നവ്യഗ്രമീ മുഖ്യമാഖ്യാനം കേട്ടുകൊൾക നീ.
കാര്യാകാര്യതീർപ്പിൽ ഒരു ദീർഘസൂത്രന്റെയാംകഥ
ആഴം കുറഞ്ഞു മത്സ്യങ്ങളേറെയുള്ളൊരു പൊയ്കയിൽ
മൂവരുണ്ടായി മത്സ്യങ്ങൾ കുന്തീനന്ദന, കൂട്ടുകാർ.
അതിലേകൻ ദീർഘദർശിയുൽപന്നപ്രതിഭൻ പരൻ
ദീർഘസൂത്രൻ മറ്റൊരുവൻ സഹചാരികൾ മൂവരിൽ.
ഒരിക്കലാപ്പല്വലത്തെ മീൻപിടിപ്പവർ മുറ്റുമേ
പല തോടുവഴിക്കായി വെള്ളം വാർത്തങ്ങൊഴുക്കിനാർ.
ആപ്പല്വലം ക്ഷയിപ്പോന്നായി കണ്ടറിഞ്ഞു ഭയാഗമേ
ദീർഘദർശി പറഞ്ഞാനാ രണ്ടിഷ്ടരോടുമപ്പൊഴേ;
ജലജന്തുക്കൾക്കശേഷമീയൊരാപത്തു വന്നുതേ
ഉടൻ മറ്റൊരിടം പോക ദോഷംപറ്റാത്ത മാർഗമേ.
വരാവുന്നോരനർത്ഥത്തെ നയംകൊണ്ടു തടുപ്പവൻ
സംശയത്തിൽപ്പെടാ ബോധിക്കുവിൻ പോവുക നാമുടൻ.
ദീർഘസൂത്രനതിൽച്ചൊന്നാൻ: " ശരിയാണങ്ങു ചൊന്നതും
പരിഭ്രമിച്ചീടരുതെന്നാണെനിക്കുള്ള നിശ്ചയം".
പിന്നെ പ്രത്യുത്പന്നമതി ദീർഘദർശിയൊടോതിനാൻ
കാലം വന്നാലൊഴിവെനിക്കില്ലാതാവില്ല ന്യായമായ്.
എന്നുകേട്ടവിടംവിട്ടു ദീർഘദർശി മഹാമതി
ആത്തോടുവഴിയേ പുക്കാൻ ഗംഭീരസലിലാശയം

DRAFT

പിന്നെജ്ജലാശയം വെള്ളംവാർന്നതായ്പ്പാർത്തു കണ്ടുടൻ
മത്സ്യജീവികൾ മത്സൗഘം ബന്ധിച്ചു പലകൗശലാൽ.
വെള്ളം വാർന്നാപ്പല്വലത്തെ കലക്കീടുന്ന നേരമേ
ബന്ധനത്തിൽപ്പെട്ടു ദീർഘസൂത്രനും മറ്റു കൂട്ടരും.
മത്സ്യങ്ങളെക്കയറുകൊണ്ടു കെട്ടുന്ന നേരമേ
അവറ്റിന്നിടയിൽച്ചെന്നുപറ്റീ സമ്പ്രതിപത്തിമാൻ
എടുക്കാവുന്നൊരാക്കെട്ടു പറ്റിത്താൻ നിന്നിതായവൻ
ഒക്കെയും കെട്ടിലാപ്പെട്ടിതെന്നുമോർത്തീടിനാരവർ.
പിന്നെ മത്സ്യങ്ങളെ മഹാജലത്തിൽക്കഴുകുമ്പൊഴേ
പാശത്തെ വിട്ടൊഴിഞ്ഞാനാ പ്രത്യുൽപ്പന്നമതി ക്ഷണാൽ.
ദീർഘസൂത്രൻ ദൈന്യമാർന്നു ബുദ്ധികെട്ടോൻ വിചേതനൻ
മരണം നേടിനാൻ മൂഢനിന്ദ്രിയംകെട്ട മട്ടുതാൻ.
ഏവംവന്നേറ്റകാലത്തെ മോഹത്താലറിയാത്തവൻ
ദീർഘസൂത്രഝഷം പോലെയുടൻതന്നെ നശിക്കുമേ.
മിടുക്കൻ ഞാനെന്നുവെച്ചു നന്മ മുൻചെയ്യിടാത്തവൻ
സംശയത്തിൽപ്പെടും വന്നാൽക്കൈകൊണ്മാനെന്നവണ്ണമേ.
വരാവതു തടുപ്പോനും വന്നാൽക്കൈകൊണ്ടുവോനുമേ
രണ്ടുപേരും സുഖംനേടും ദീർഘസൂത്രൻ നശിച്ചിടും.
കല കാഷ്ഠമുഹൂർത്തങ്ങൾ ലവം രാപ്പകലങ്ങനെ
മാസം പക്ഷം ഷഡൃതുവും കല്പം സംവത്സരങ്ങളും
മന്നല്ലോ ദേശമായ്ച്ചൊൽവൂ കാലമെന്നതു കണ്ടിടാ
അഭീഷ്ടകാര്യസിദ്ധിക്കായ്ദ്ധ്യാനിക്കുന്നതുമങ്ങനെ.
ഇവ ധർമ്മാർത്ഥശാസ്ത്രത്തിൽ മോക്ഷശാസ്ത്രത്തിലും ശരി
കാമശാസ്ത്രത്തിലും മുഖ്യമായിച്ചൊൽവൂ മഹർഷികൾ.
അഭീഷ്ടദേശകാലങ്ങൾ നോക്കി നന്നായ് നടത്തണം
സജ്ജൻ പരീക്ഷിച്ചു ചെയ്വോനിവയാൽ ഫലമേറ്റിടും.

2. വിദ്വാൻ കെ. പ്രകാശത്തിന്റെ ഗദ്യരൂപത്തിലുള്ള മത്സ്യത്രയകഥയുടെ ഭാഗം.

ശകുലോപാഖ്യാനം

ഭീഷ്മൻ പറഞ്ഞു: വരാൻ പോകുന്ന ആപത്തിനെ കണ്ടറിഞ്ഞ് തടുക്കുന്നവനും വന്നുചേർന്ന ആപത്തിൽ തന്ത്രപരമായി രക്ഷപ്പെടുവാനുള്ള ബുദ്ധിപ്രയോഗിക്കുന്നവനും ഇങ്ങനെ രണ്ടുപേർ ആപത്തു വിട്ടുകയറി സുഖിക്കും. എന്നാൽ ദീർഘസൂത്രൻ (മന്ദനായവൻ) നശിക്കുക തന്നെ ചെയ്യും.

ഇതിന് ഉദാഹരണമായ ഒരു കഥ നാട്ടിൽ നടപ്പുണ്ട്. അത് ഞാൻ പറഞ്ഞുതരാം, യുധിഷ്ഠിര! അത് നീ കേട്ടുകൊള്ളുക. കാര്യാകാര്യങ്ങൾ തീരുമാനിക്കുന്നതിൽ നിനക്ക് ഈ 'ദീർഘസൂത്രന്റെ കഥ' ഉപകരിക്കുന്നതാണ്.

മൂന്ന് മത്സ്യങ്ങളുടെ കഥ

ആഴം കുറഞ്ഞതും മത്സ്യങ്ങൾ വളരെയുള്ളതുമായ ഒരു പൊയ്കയിൽ മൂന്നു മത്സ്യങ്ങൾ കൂട്ടുകാരായി ജീവിച്ചു. കുന്തീപുത്രാ! അതിൽ ഒരുത്തന്റെ പേർ 'ദീർഘദർശി' എന്നാണ്. രണ്ടാമത്തവന്റെ പേര് പ്രത്യുൽപ്പന്നമതി എന്നാണ്. മൂന്നാമത്തവന്റെ പേര് ദീർഘസൂത്രൻ എന്നുമാണ്. ഇവർ സഹചാരികളായി കഴിഞ്ഞിരുന്നു.

ഒരു ദിവസം കുറേ മീൻപിടുത്തക്കാർ വന്ന് ഈ പൊയ്കയിൽ നിന്ന് തോട് വഴിക്ക് വെള്ളം വാർത്ത് ഒഴുക്കുവാൻ തുടങ്ങി. പൊയ്കയിലെ വെള്ളമൊക്കെ ഒഴുകി പോകുന്നത് കണ്ടപ്പോൾ ദീർഘദർശി തന്റെ രണ്ട് സ്നേഹിതന്മാരെയും വിളിച്ച് ഇപ്രകാരം പറഞ്ഞു: സ്നേഹിതന്മാരെ ജലജന്തുക്കൾക്കെല്ലാം ഇതാ അത്യാപത്ത് നേരിട്ടിരിക്കുന്നു. ഉടനെ നാം ഈ പൊയ്ക വിട്ട് മറ്റൊരിടത്ത് രക്ഷപ്പെടണം. അല്ലെങ്കിൽ നാം കെണിയിൽ കുടുങ്ങി പോകും. വരാൻ പോകുന്ന അനർത്ഥം കണ്ടറിഞ്ഞ് നയംകൊണ്ട് തടുക്കുന്നവൻ സംശയത്തിൽപെട്ട് പോവുകയില്ല. അതു നല്ലതുപോലെ മനസ്സിലാക്കി നാം ഈ സ്ഥലം വിട്ട് ഉടനെ പോവുക.

ഈ ഉപദേശം കേട്ട് ദീർഘസൂത്രൻ പറഞ്ഞു സ്നേഹിതാ, നീ പറഞ്ഞത് ശരിയാണ് എങ്കിലും പരിഭ്രമിക്കാതിരിക്കുക. ഉടനെ വിടേണ്ട

DRAFT

Draft Copy


കാര്യമില്ലെന്നാണ് എനിക്ക് തോന്നുന്നത്.

പിന്നെ പ്രത്യുൽപ്പന്നമതി ദീർഘദർശിയോട് പറഞ്ഞു കാലം വരുമ്പോൾ ഞാൻ രക്ഷപ്പെട്ടു കൊള്ളാം അപ്പോൾ ന്യായമായ വഴിക്ക് ഞാൻ കടന്നുകളയും.

അങ്ങനെ ദീർഘദർശി രണ്ടു മഹാന്മാരുടെ അഭിപ്രായവും കേട്ടു. കൊറ്റിന് വകയുള്ള സ്ഥലം വിടുവാൻ അവർ മടിച്ചെങ്കിലും മഹാശയനായ ദീർഘദർശി അവിടെ നിന്നില്ല. അവൻ ആ തോട് വഴിക്ക് പോയി വിശാലമായ വേറെ ജലാശയത്തിൽ ചെന്നുചേർന്നു.

അങ്ങനെ തടാകത്തിലെ വെള്ളമൊക്കെ വാർന്നു പോയി. മീൻപിടുത്തക്കാർ പല കൗശലങ്ങൾ പ്രയോഗിച്ചു. വലയും തൈതലുമായി മത്സ്യത്തെ അവിടവിടെ ബന്ധിച്ചു നിർത്തി. വെള്ളം കുറഞ്ഞ ആ പൊയ്ക കലക്കുന്ന സമയത്ത് ദീർഘസൂത്രനും മറ്റു കൂട്ടുകാരും ബന്ധനത്തിൽപ്പെട്ടു. മത്സ്യങ്ങളെ കയറുകൾ കൊണ്ട് കെട്ടുന്ന സമയത്ത് അവയുടെ ഇടയിൽ ചെന്ന് പ്രത്യുൽപ്പന്നമതി പറ്റിക്കൂടി. എടുക്കാവുന്ന കെട്ടെടുത്ത് ആ മീൻപിടുത്തക്കാരൻ നിന്നു. എല്ലാ മത്സ്യത്തെയും കോർത്തുകെട്ടി എന്ന് അവനും വിചാരിച്ചു. പിന്നെ മറ്റൊരു ജലാശയത്തിൽ തെളിഞ്ഞ വെള്ളത്തിൽ കഴുകുന്ന സമയത്ത് പാശത്തെ വിട്ട് പ്രത്യുൽപ്പന്നമതി ക്ഷണത്തിൽ ചാടിക്കളഞ്ഞു. ദീർഘസൂത്രൻ ദുഃഖിച്ചു. അവൻ ബുദ്ധികെട്ട് മൂഢനായി ചരടിൽ കോർക്കപ്പെട്ടവനായി കിടന്നുപിടഞ്ഞു. അവൻ ദുഃഖിച്ചു ചരടിൽ കുടുങ്ങിക്കിടന്ന് വീർപ്പുമുട്ടി ചത്തു.

ഇപ്രകാരം കാലം സമാഗതമാകുമ്പോൾ പലപല മോഹങ്ങൾ കാരണം ചിന്തിച്ച് അറിയാതിരിക്കുന്നവൻ ദീർഘസൂത്രൻ എന്ന മത്സ്യത്തിന്റെ മാതിരി ആപത്തിൽ കുടുങ്ങി മരിക്കുവാൻ ഇടവരും. ഞാൻ മിടുക്കനാണ് എന്നു നടിച്ച് മുമ്പേ നന്മ ചെയ്യാത്തവൻ സംശയത്തിൽപ്പെട്ട് ദുഃഖിക്കാൻ ഇടവരും. വന്നാൽ അതിന് അപ്പോൾ പ്രതിവിധി കാണുന്നവൻ രക്ഷപ്പെട്ടു എന്ന് വരാം.

വരാവുന്നത് മുൻകൂട്ടിയറിഞ്ഞ് അതിനെ തടുക്കുന്നവനും വന്നുചേർന്നതിൽ മറുകൈ കാണുന്നവനും സുഖം നേടും. എന്നാൽ ദീർഘസൂത്രൻ നശിക്കുക തന്നെ ചെയ്യും.

കല, കാഷ്ഠമുഹൂർത്തങ്ങൾ, ലവം, രാപ്പകലുകൾ, മാസം, പക്ഷം,

DRAFT

Draft Copy

ആറുഋതുക്കൾ, കൽപം, സംവത്സരങ്ങൾ എന്നിവ കാലങ്ങളാണ്. അവയെ പ്രത്യക്ഷമായി കാണുകയില്ല. ഭൂമിക്കുള്ള വിഭാഗങ്ങളെ ദേശം എന്നു പറയുന്നു. ഈ കാലദേശങ്ങളെ അഭീഷ്ടകാര്യസിദ്ധിക്ക് കണ്ടറിഞ്ഞ് വേണ്ടത് വേണ്ടപ്പോൾ ചെയ്യണം. ഇവ ധർമ്മശാസ്ത്രത്തിലും അർത്ഥശാസ്ത്രത്തിലും കാമശാസ്ത്രത്തിലും മഹർഷിമാർ വളരെ മുഖ്യമായി പ്രസ്താവിച്ചിട്ടുണ്ട്. അങ്ങനെ അഭീഷ്ടമായ ദേശവും കാലവും നന്നായി നോക്കി കാര്യം നടത്തണം. അതിനു തയ്യാറുള്ളവൻ പരീക്ഷിച്ച് കാര്യം നടത്തുന്നവൻ അതിന്റെ ഫലം തീർച്ചയായും അനുഭവിക്കുന്നതാണ്.

**अधिकवाचनांशः।**

**1. अमरकोशः-पारमेश्वरी**

1. पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः।
   वारिवर्गः प्रथमकाण्डम् P.263, कारिका -18.
2. कैवर्ते दाशधीवरौ
   वारिवर्गः प्रथमकाण्डम् P.262, कारिका -16.
3. जलाशयो जलाधारस्तत्रागाधजलो ह्रदः।
   वारिवर्गः प्रथमकाण्डम् P.262, कारिका -26.
   आहावस्तु निपानं स्यादुपकूपजलाशये।।
   वारिवर्गः प्रथमकाण्डम् P.262, कारिका -27.
4. स्निग्धो सवयाऽथ मित्रं सखा सुहृत्।
   क्षत्रियवर्गः द्वितीयकाण्डम् P.650, कारिका -12.
5. आनाय पुंसि जालं स्याच्छणसूत्रं पवित्रकम्।
   मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम्। ।
   वारिवर्गः प्रथमकाण्डम् P.262, कारिका -17.

DRAFT

Draft Copy


**सूचनाग्रन्थाः।**


1. महाभारतम् – वेदव्यासः पञ्चमखण्डः, शान्तिपर्वः, गीता प्रेस्, गोरख़्पूर्, PO5424

2. Bhagavd Gita as it is, Bhakti Vedanta Book Trust, pp 924.

3. अमरकोशः, Chaukhamba Sanskrit Pusthakalaya, Varanasi, 2022, pp203.

4. മഹാഭാരതം വിവർത്തനം - പദ്യരൂപം - കുഞ്ഞിക്കുട്ടൻ തമ്പുരാൻ

5. വ്യാസമഹാഭാരതകഥ (വാല്യം 4) ഗദ്യവിവർത്തനം വിദ്വാൻ കെ. പ്രകാശം, ഡി.സി. ബുക്സ്.

6. A short History of Sanskrit Literature, R.S. Vadhyar & Sons, kalpathi, Palaghat, 1989 pp212.

7. Teachers' Hand Book Sanskrit (Part II) Std IX for Sanskrit Schools, Department of Education, Government of Kerala,2010.pp 55.

8. केरलपाठावलिः संस्कृतम्, संस्कृतविद्यालयानां कृते, कक्ष्या IX, Government of Kerala, Department of General Education. pp 88.

9. लघुसिद्धान्तकौमुदी, गीताप्रेस्, गोरख़्पूर् , pp 362.

10. लघुसिद्धान्तकौमुदी प्रथमो भागः। बालहितैषिणी व्याख्यासहितः, प्रोफ. आर्. वासुदेवन् पोट्टी, गवर्मेण्ड् संस्कृत कोलेज् कम्मिट्टि, तृप्पूणित्तुरा, 1993.

11. रूपचन्द्रिका, भारतीयविद्याप्रकाशन्, दिल्ली, वाराणसि 1998, pp 697.

12. സംസ്കൃതസാഹിത്യചരിത്രം (വോള്യം 2), കേരളസാഹിത്യ അക്കാദമി, 1991,pp444.

13. അമരകോശം, പഞ്ചാംഗം പുസ്തകശാല, കുന്ദംകുളം, 2012, pp400.

14. अमरकोशः - पारमेश्वरीव्यख्यानम्, वाचस्पति टी. सी. परमेश्वरन् मूसत्, केरलसाहित्य अक्कादमी, 2008, Ist Edn.


⊙ ⊙ ⊙ ⊙

DRAFT

Draft Copy

# पाठः २ वसन्तागमः।

| | | |
|---|---|---|
| एककम् | - | १ - साहितीलयः। |
| पाठसंख्या | - | २ |
| पाठस्य नाम | - | वसन्तागमः। |
| व्यवहाररूपम् | - | काव्यम्। |
| कालांशः | - | ९ |
| आशयः | - | प्रकृतिः। |
| उपाशयः | - | प्रकृतिसौन्दर्यम्। |
| आशयाः/धारणाः | - | महाकविकालिदासविरचितात् ऋतुसंहारात् वसन्तवर्णनापराः चतुश्श्लोकाः। |
| मूल्यानि/ मनोभावाः | - | पौराणिकसाहित्यं प्रति आदरः।<br>काव्यपठनेन धार्मिकमूल्यानि स्वांशीकृत्य स्वजीविते प्रयुङ्क्ते।<br>अलङ्कारपठनेन काव्यास्वादनतात्पर्यं वर्धयति। |

DRAFT

पठनलक्ष्याणि

आशयपरम् /भाषापरम्-

- पाठं सम्यक् पठित्वा नूतनपदानां चयनाय अर्थलेखनाय च सामर्थ्यसम्पादनम्।
- संश्लिष्टपदानां विवेचनाय विश्लेषणाय च सामर्थ्यसम्पादनम्।
- समस्तपदानि विविच्य विग्रहवाक्यलेखनाय सामर्थ्यसम्पादनम्।
- आकाङ्क्षाप्रश्नानाम् उत्तराणि क्रोडीकृत्य अन्वयलेखनाय सामर्थ्यसम्पादनम्।
- श्लोकस्य आशयमवगम्य स्ववाक्यैः लेखनाय सामर्थ्यसम्पादनम्।

Draft Copy



- श्लोकस्य गणनिर्णयाय वृत्तनिर्धारणाय च सामर्थ्यसम्पादनम्।
- श्लोकस्याशयावगमनपूर्वकम् अलङ्कारनिर्णयाय लक्ष्यलक्षणसमन्वयाय च सामर्थ्यसम्पादनम्।
- कवितायाः संस्कृतेन कैरल्यां च आलपनाय शब्दमुद्रणाय च सामर्थ्यसम्पादनम्। (ICT)
- वृक्षाणां रोपणाय संरक्षणाय च तात्पर्यसम्पादनम्।

पठनोपकरणानि - पाठपुस्तकं, हस्तपुस्तकं, कुवलयानन्दम्, वृत्तरत्नाकरः, ऋतुसंहारम्, सान्द्रमुद्रिका, ध्वनिमुद्रिका, ICT इत्यादयः।

## पठनप्रवर्तनानाम् आसूत्रणम्

| क्रमसंख्या | प्रवर्तनानि | प्रतीक्षितकालांशः |
|---|---|---|
| 1. | आमुखप्रवर्तनम् | |
| | नूतनपदचयनम् अर्थलेखनं च। | २ |
| 2. | सन्धिविश्लेषणं | |
| 3. | विग्रहवाक्यलेखनं च। | १ |
| 4. | अन्वयलेखनम्। | १ |
| 5. | आशयलेखनम्। | १ |
| 6. | वृत्तनिर्धारणम् । | |
| 7. | अलङ्कारसामर्थ्यम्। | २ |
| 8. | गानाविष्करणम्। | २ |
| 9. | चेन्कुरिञ्ञी बालवृक्षाणां रोपणं संरक्षणं च | बहिर्प्रवर्त्तनम् |
| | **आहत्य** | ९ |

DRAFT

Draft Copy

## पाठस्य आमुखं पाठप्रवेशकप्रवर्तनं च।

अध्यापकः महाकवेः कुमारनाशान् महोदयस्य पुष्पवाटिका नामकात् कैरलीकवितासमाहारात् उद्धृतम् -

പൂക്കുന്നിതാ മുല്ല പൂക്കുന്നിലഞ്ഞി
പൂക്കുന്നു തേന്മാവ് പൂക്കുന്നശോകം
വായ്ക്കുന്നു വേലിക്കു വർണ്ണങ്ങൾ പൂവാൽ
ചോക്കുന്നു കാടന്തിമേഘങ്ങൾപോലെ
എല്ലാടവും പുഷ്പഗന്ധം പരത്തി
മെല്ലെന്നു തെക്കുന്നു വീശുന്നു വായു
ഉല്ലാസമീ നീണ്ട കൂകൂരവത്താൽ
എല്ലാർക്കുമേകുന്നിതേ കോകിലങ്ങൾ.

इति कवितांशं श्रावयति। तदनन्तरम् अध्यापकः महाकविकालिदासमधिकृत्य श्रुतवन्तः वा? इति पृच्छति। ततः तद्विषये छात्राणां पूर्वज्ञानं शोधयति।

१. महाकविकालिदासविरचितानि नाटकानि कानि?

२. महाकविकालिदासविरचितानि महाकाव्यानि कानि?

३. महाकविकालिदासप्रणीतानि खण्डकाव्यानि कानि?

अध्यापकः छात्राणां प्रतिवचनानि श्रुत्वा विशदीकरणं ददाति। अनन्तरं महाकविप्रणीते द्वे खण्डकाव्ये मेघदूतम्, ऋतुसंहारम् च इत्युक्त्वा पाठस्य आमुखवाचनाय छात्रान् प्रेरयति (TB Page 21)। वाचनानन्तरं पठिताशयमधिकृत्य प्रश्नान् पृच्छति। उत्तराणि श्यामफलके लिखति च। अनन्तरं पाठभागे दत्तानां श्लोकानां सङ्घे स्थित्वा वाचनाय निर्दिशति।

DRAFT

### प्रक्रियाविशदीकरणम्।

**प्रवर्तनम् - १ नूतनपदचयनम् अर्थविवेचनं च।**

**उद्देश्यम्**-पाठं सम्यक् पठित्वा नूतनपदानां चयनाय अर्थलेखनाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापकः छात्रान् सङ्घान् करोति। अनन्तरं पाठभागं पठित्वा

Draft Copy


नूतनपदानां चयनाय निर्दिशति। सङ्घे चर्चां कृत्वा पाठभागस्थानां श्लोकानां पदार्थान् निरीक्ष्य लेखनाय निर्दिशति। अनन्तरं सङ्घात् एकः इति क्रमेण कक्ष्यायामवतारयति। वाचने लेखने च जातानि स्खालित्यानि अध्यापकः संशोधयति। अनन्तरं छात्राः परस्परं विनिमाय टिप्पणीपुस्तकस्य संशोधनाय निर्दिशति। टिप्पणीपुस्तकस्य संशोधनं सम्यक् कृतमिति अध्यापकः निर्धारयति। अधोदत्तसूचकानि आधारीकृत्य मूल्यनिर्णयं च करोति।

**मूल्यनिर्णयसूचकाः -**

१. उचितपदानां चयनम्।

२. अक्षरव्यक्ततया पदानामर्थलेखनम्।

अन्ते 'किमधिगतम् ' इत्यत्र अङ्कनाय निर्दिशति।

## प्रवर्तनम् - २ संश्लिष्टपदचयनं लेखनं च।

**उद्देश्यम् -** संश्लिष्टपदानां विवेचनाय विश्लेषणाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** उचितरीत्या अध्यापकः छात्रान् सङ्घान् करोति। छात्राः सङ्घे चर्चां कृत्वा पाठभागात् संश्लिष्टपदानि चित्वा लिखन्ति। अनन्तरं पदच्छेदं निरीक्ष्य लेखनाय निर्दिशति। सङ्घात् एकः इति क्रमेण कक्ष्यायामवतारयति। अध्यापकः वाचने अवतारणे च जातानि स्खालित्यानि परिहृत्य श्यामफलके लिखति। ततः संशोधनं कृत्वा लेखनाय छात्रान् निर्दिशति। अनन्तरं छात्राः परस्परं टिप्पणीपुस्तकस्य संशोधनाय निर्दिशति। संशोधनानि सम्यक् कृतमिति अध्यापकः निरीक्ष्य निर्धारयति। पदानां विश्लेषणमधिकृत्य सूत्राणां विशदीकरणमपि करोति। अन्योदाहरणानि परिचिनोति च।

यथा - कुर्वन्ति + अशोकाः - कुर्वन्त्यशोकाः (इकोयणचि)।

सहसा + उत्सुकत्वम्- सहसोत्सुकत्वम् (आद्गुणः)।

भवेत् + न - भवेन्न (यरोऽनुनासिकेऽनुनासिको वा)

DRAFT

Draft Copy

बाणनिकरैः + व्यथितम् -बाणनिकरैर्व्यथितम् (विसर्जनीयस्य सः,ससजुषोः रुः)।

नववधूः + इव – नववधूरिव (विसर्जनीयस्य सः,ससजुषोः रुः)।

अधोदत्तसूचकानि आधारीकृत्य मूल्यनिर्णयं च करोति।

**मूल्यनिर्णयसूचकाः -**

१. संश्लिष्टपदचयनम्। २. उचितरीत्या पदविश्लेषणम्।

३. सूत्रार्थज्ञानम्।

अन्ते 'किमधिगतम्' इत्यत्र अङ्कनाय निर्दिशति।

**प्रवर्तनम् - ३ विग्रहपदचयनं लेखनं च।**

**उद्देश्यम् -** समस्तपदानि विविच्य विग्रहवाक्यलेखनाय सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापकः समस्तपदानि विग्रहवाक्यानि च चार्ट्पत्रे/ICT द्वारा प्रदर्शयति। ततः छात्राः मातृकानुसारं विग्रहपदानि पाठभागात् चित्वा टिप्पणीपुस्तके लिखन्ति। लेखनावसरे छात्रैः अनुभूयमानान् क्लेशान् अध्यापकः परिहरति। ततः छात्राः कक्ष्यायामवतारयन्ति। छात्राः लिखितपदानां संशोधनं परस्परं कुर्वन्ति। अन्ते अध्यापकः छात्राणां टिप्पणीपुस्तकं निरीक्ष्य संशोधनं सम्यक् कृतमिति निर्धारयति।

अधोदत्तसूचकानि आधारीकृत्य मूल्यनिर्णयं च करोति।

**मूल्यनिर्णयसूचकाः -**

१. चर्चायां भागभागित्वम्। २. आशयावगमनम्।

३. टिप्पणीपुस्तके लेखनम्।

अनन्तरं 'किमधिगतम्' इत्यत्र अङ्कनं कर्तुं छात्रान् प्रेरयति।

**प्रवर्तनम् - ४ कक्ष्यायां चर्चित्वा श्लोकानामन्वयं लिखति।**

**उद्देश्यम् -** आकाङ्क्षाप्रश्नानाम् उत्तराणि क्रोडीकृत्य अन्वयलेखनाय सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापकः छात्रान् सङ्घीकृत्य प्रतिविभागं श्लोकं दत्वा सम्यग्वाचनाय निर्दिशति। छात्राः चर्चां कृत्वा आकांक्षाप्रश्नान् सम्यक् पठित्वा उत्तराणि च निरीक्ष्य

DRAFT

Draft Copy



क्रमीकृत्य गद्यरूपेण लिखन्ति। अनन्तरं पाठपुस्तकस्थेन अन्वयेन सह तुलनं कृत्वा परिष्कुर्वन्ति। परिष्कृतरूपं कक्ष्यायाम् अवतारणाय निर्दिशति। अध्यापकः उचितसाहाय्यं ददाति। अधोदत्तसूचकानि आधारीकृत्य मूल्यनिर्णयमपि करोति।

**मूल्यनिर्णयसूचकाः -**

१. चर्चायां भागभागित्वम्। २. आशयावबोधः।

३. अन्वयस्य लेखनम्।

अनन्तरं 'किमधिगतम्' इत्यत्र अङ्कनं कर्तुं छात्रान् प्रेरयति।

**प्रवर्तनम् - ५ सङ्घे चर्चित्वा श्लोकस्य आशयं स्वांशीकृत्य लेखनम्।**

**उद्देश्यम् -** श्लोकस्य आशयमवगम्य स्ववाक्यैः लेखनाय सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापकः छात्रान् सङ्घीकृत्य श्लोकानामाशयलेखनाय निर्दिशति। छात्राः पाठव्याख्यानं सङ्घे चर्चित्वा आशयान् टिप्पणीपुस्तके लिखन्ति। प्रतिसङ्घं लिखितमाशयं परस्परं विनिमाय पठन्ति। अध्यापकेन स्खालित्यनिवारणाय अवश्यं साहाय्यं दातव्यम्। ततः छात्राः आशयं परिष्कृत्य लिखति। अधोदत्तसूचकानि आधारीकृत्य मूल्यनिर्णयं च करोति।

**मूल्यनिर्णयसूचकाः -**

१.आशयपूर्णता। २. वाक्यघटना। ३. भाषाशुद्धिः।

अनन्तरं 'किमधिगतम्' इति स्वयंमूल्यनिर्णये च अङ्कनं कर्तुं छात्रान् निर्दिशति।

**प्रवर्तनम् - ६ उदाहरणानुसारं पाठस्थश्लोकानां गणनिर्णयं कृत्वा वृत्तं निर्धारयति।**

**उद्देश्यम् -** श्लोकस्य गणनिर्णयाय वृत्तनिर्धारणाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापकः छात्रान् सङ्घान् कृत्वा प्रतिसङ्घं श्लोकान् ददाति। पठितपूर्वां गणव्यवस्थां स्मारयित्वा प्रतिसङ्घं एकैकस्य पादस्य गणनिर्णयाय अवतरणाय च निर्दिशति। अध्यापकेन स्खालित्यपरिहरणाय अवश्यं साहाय्यं करणीयम्।

DRAFT

Draft Copy

पाठभागस्थानाम् उदाहरणानां साहाय्येन छात्राः चर्चां कृत्वा वृत्तं निर्धारयति। अनन्तरम् अध्यापकस्य साहाय्येन वृत्तलक्षणसमन्वयं कृत्वा टिप्पणीपुस्तके लिखित्वा अवतारयन्ति। छात्राः परस्परमूल्यनिर्णयः कुर्वन्ति। अध्यापकः टिप्पणीपुस्तकं संशोध्य सम्यक् कृतमिति निर्धारयति। अधोदत्तसूचकानि आधारीकृत्य मूल्यनिर्णयमपि करोति।

**मूल्यनिर्णयसूचकाः -**

१. गणविवेचनं कृत्वा गुरुलघुनिर्णयः। २. वृत्तनामलेखनम्।

३. लक्षणसमन्वयः। (उपजातिः, वसन्ततिलका)

अनन्तरं 'किमधिगतम्' इति स्वयंमूल्यनिर्णये च अङ्कनं कर्तुं छात्रान् निर्दिशति।

**टिप्पणिः - लघुगुरुव्यवस्था।**

लघुगुरुविवेकः -

ह्रस्वो लघुः। यस्य अक्षरस्य/शब्दस्य उच्चारणाय एकमात्रात्मकं कालमपेक्षते स ह्रस्वः लघुः इति।

दीर्घो गुरुः। सानुस्वारः सविसर्गः संयोगात्पूर्वः ह्रस्वोऽपि उच्चारणाय मात्राधिकं कालमपेक्षते इति हेतोः ते ह्रस्वाः अपि गुरुत्वमार्जयन्ति।

गणविवेकः - आदिमध्यावसानेषु यरता यान्ति लाघवम्

भजसा गौरवं यान्ति मनौ तु गुरुलाघवौ।।

गुरुः "- "चिह्नेन, लघुः "U"चिह्नेन च सूच्यते।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| यगणः | ⇨ | U - - | ⇨ | आदिलघुः | जगणः | ⇨ | U - U | ⇨ | मध्यगुरुः |
| रगणः | ⇨ | - U - | ⇨ | मध्यलघुः | सगणः | ⇨ | U U - | ⇨ | अन्त्यगुरुः |
| तगणः | ⇨ | - - U | ⇨ | अन्त्यलघुः | मगणः | ⇨ | - - - | ⇨ | सर्वगुरुः |
| भगणः | ⇨ | - U U | ⇨ | आदिगुरुः | नगणः | ⇨ | U U U | ⇨ | सर्वलघुः |

DRAFT

Draft Copy



त त ज गु गु
- -U | - - U | U-U | - -
अस्त्युत्त|रस्यां दि|शि देव|तात्मा

ज त ज गु गु
U -U | - - U | U - U | - -
हिमाल|यो नाम |नगाधि|राजः।

त त ज गु गु
- -U | - - U | U - U | - -
पूर्वाप|रौ वारि|निधीव|गाह्य

ज त ज गु गु
U - U | - - U | U - U | - -
स्थितः पृ|थिव्या इ|व मान|दण्डः।।

**प्रवर्तनम् - ७ अलङ्कारनिर्णयः लक्ष्यलक्षणसमन्वयश्च। (उद्ग्रथित प्रवर्तनम्)**

**उद्देश्यम् -** श्लोकस्याशयावगमनपूर्वकम् अलङ्कारनिर्णयाय लक्ष्यलक्षणसमन्वयाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** प्रथमश्लोकस्य (आमूलतो..) आशयग्रहणानन्तरम् अध्यापकः श्लोके पादेषु पदेषु च केषां पदानाम् अक्षराणां च आवर्तनं कृतम्? इति पृच्छति। तेषामुत्तरं प्रदर्शयित्वा अनुप्रासालङ्कारस्य लक्षणं विशदीकरोति। वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च इति। तदनन्तरं श्लोकस्य लक्षणसमन्वयं करोति। अनन्तरं "नवपलाशपलाशवनम्", "यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो" इत्येतौ श्लोकौ अपि अनुप्रासस्य उदाहरणे भवतः इति वदति विशदयति च। ततः कक्ष्यायामवतारणाय छात्रान् प्रेरयति। उचितं साहाय्यमपि करोति। अनन्तरं टिप्पणीपुस्तके लेखनाय निर्दिशति। लिखितस्य शोधनं करोति। अवश्यं चेत् परिष्कृत्य लेखनाय निर्दिशति। मातृभाषायां समानालङ्कारस्य लक्षणोदाहरणानि च विशदयति।

ശബ്ദാലങ്കാരം

അക്ഷരക്കൂട്ടങ്ങളും കൂട്ടക്ഷരങ്ങളുമാവർത്തിച്ച്
ശബ്ദഭംഗിയുളവാക്കുന്നത് ശബ്ദാലങ്കാരം.

അനുപ്രാസം

അനുപ്രാസം വ്യഞ്ജനത്തെ
ആവർത്തിക്കിലിടയ്ക്കിടെ.

DRAFT

Draft Copy

ഒരേ വ്യഞ്ജനാക്ഷരങ്ങൾ ഇടക്കിടക്ക് ആവർത്തിക്കുന്നതാണ് അനുപ്രാസം.
ഉദാ:

അക്കാലത്തുപൊറുക്കാഞ്ഞു
താരകന്റെ പരാക്രമം
അണ്ടർക്കോൻ മുമ്പാരുമുമ്പർ
സത്യലോകത്തിലെത്തിനാർ

(കുമാരസംഭവം, പരിഭാഷ: ഏ. ആർ. രാജരാജവർമ്മ)

പ്രേമദഞ്ച മേ കാമദഞ്ച മേ
വേദനഞ്ച മേ വൈഭവഞ്ച മേ
ജീവനഞ്ച മേ ജീവിതഞ്ച മേ
ദൈവതഞ്ച മേ ദേവ നാപരം. (ശ്രീകൃഷ്ണകർണാമൃതം, 1-104)

ततः लक्षणोदाहरणानां वाचनाय निर्दिशति। छात्रैः किमवगतमिति ज्ञातुं अध्यापिका प्रश्नान् पृच्छति । अधोदत्तसूचकानि आधारीकृत्य मूल्यनिर्णयमपि करोति।

**मूल्यनिर्णयसूचकाः -**

१.टिप्पणीपुस्तकस्यावलोकनम्। २. प्रश्नानामुत्तरदानम्।

३. इतरोदाहरणानाम् उक्तिः।

अनन्तरं 'किमधिगतम् ' इति स्वयंमूल्यनिर्णये अङ्कनं कर्तुं छात्रान् निर्दिशति।

## प्रवर्तनम् - ८ संस्कृतेन कैरल्यां च कवितायाः गानाविष्कारः। (उद्ग्रथितप्रवर्तनम् (ICT डिजिट्टल् विभवः))।

**उद्देश्यम् -** कवितायाः संस्कृतेन कैरल्यां च आलपनाय शब्दमुद्रणाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -** अध्यापकः स्वयं वा ICT साहाय्येन वा पाठभागस्थ श्लोकानामालपनं (मूलम् अनूदितं च) श्रावयति। छात्रान् सङ्घान् कृत्वा प्रतिविभागं श्लोकान् दत्वा सङ्घे चर्चां कृत्वा आलपनाय निर्दिशति। आलपनावसरे क्लेशाननुभवति चेत् अध्यापकः उचितं साहाय्यं ददाति। ततः छात्रान् वैयक्तिकरूपेण आलपितुं निर्दिशति। स्वेच्छानुसारं तालं स्वीकरोति। अध्यापकः छात्राणामालपनसमये अधोदत्तसूचकानि

DRAFT

Draft Copy



आधारीकृत्य मूल्यनिर्णयमपि करोति।

**मूल्यनिर्णयसूचकाः -**

१.आशयावगमनम्।　　　　२.भागभागित्वम्।

३.ताललयसमन्वितं व्यक्ततया आलापनम्।

अनन्तरं 'किमधिगतम्' इति स्वयंमूल्यनिर्णये अङ्कनं कर्तुं छात्रान् निर्दिशति।

**प्रवर्तनम् - ९**　　**चेन्कुरिञ्जी बालकवृक्षाणां रोपणं संरक्षणं च।**

**(उद्ग्रथितप्रवर्तनं सविशेषप्रवर्तनं च।)**

**उद्देश्यम् -**　　वृक्षाणां रोपणाय संरक्षणाय च सामर्थ्यसम्पादनम्।

**प्रक्रिया -**　　अध्यापकः चेन्कुरिञ्जी बालकवृक्षाणां रोपणं कृत्वा चेन्कुरिञ्जी संरक्षणयज्ञे भागभाक् भवितुं छात्रान् प्रेरयति। तदर्थं विद्यालयपरिसरे अन्यत्र वा निर्दिष्टस्थानेषु चेन्कुरिञ्जी बालकवृक्षाणां रोपणाय संरक्षणाय च दायित्वं ददाति। अवलोकनं च करोति।

## अनुबन्धः।

**अधिकवाचनांशः।**

### 1 भगवद्गीताश्लोकौ

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी **दीर्घसूत्री** च कर्ता तामस उच्यते ॥　　(भगवद्गीता -१८- २८)

अन्वयः - अयुक्तः प्राकृतः, स्तब्धः शठः नैष्कृतिकः अलसः विषादी दीर्घसूत्री च कर्ता तामस उच्यते।

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽह**मृतूनां कुसुमाकरः** ॥　　(भगवद्गीता -१०- ३५)

अन्वयः - तथा साम्नां बृहत्साम छन्दसां गायत्री अहम् (अस्मि)। मासानां मार्गशीर्षः ऋतूनां कुसुमाकरः अहम् (अस्मि)।

DRAFT

Draft Copy

## 2 പാഠഭാഗശ്ലോകങ്ങളുടെ ഗദ്യവിവർത്തനം

1. അടിമുതൽ പവിഴപ്പുറ്റുപോലെ തുടുത്ത പൂങ്കുലകളെ വഹിക്കുന്ന തളിരണിഞ്ഞ അശോകങ്ങൾ യൗവനയുക്തകളായ സ്ത്രീകളുടെ ഹൃദയങ്ങളെ സശോകമാക്കി ത്തീർക്കുന്നു.

2. അഴകേറിയ പുഷ്പങ്ങളെ ചുംബിക്കുന്ന മദിച്ച വരിവണ്ടുകളോടും മനോഹരങ്ങളായ നനുത്ത തളിരുകളെ ഇളക്കുന്ന മന്ദമാരുതനോടും കൂടിയ ഇളം മുല്ലവള്ളികൾ കാമിജനങ്ങളുടെ മനസ്സിൽ പെട്ടെന്ന് ഉത്കണ്ഠയുണ്ടാക്കുന്നു.

3. പ്രിയാമുഖത്തിന്റെ കാന്തിയോടുകൂടി അടുത്തകാലത്തുണ്ടായിട്ടുള്ള ചെങ്കുറിഞ്ഞി പൂങ്കുലകളുടെ മികച്ച ശോഭ കണ്ടാൽ പ്രിയേ ഹൃദയമുള്ള ഏതൊരുവന്റെ മനസ്സാണ് കാമബാണങ്ങൾ തറച്ച് വേദനിക്കാതിരിക്കുക.

4. കാറ്റു വീശി ഇളകുന്ന പൂക്കൾ നിറഞ്ഞ ആളിക്കത്തുന്ന തീപോലുള്ള പ്ലാശിൻകാടുകളോടു കൂടിയ വസന്തകാലം പെട്ടെന്ന് എല്ലാ ദിക്കിലും വ്യാപിക്കുകയാൽ ഈ ഭൂമി രക്തവസ്ത്രം ധരിച്ച നവവധുവിനെപ്പോലെ ശോഭിക്കുന്നു.

## 3. शिशुपालवधः

### षष्ठः सर्गः

अथ रिरंसुममुं युगपद्गिरौ
कृतयथास्वतरुप्रसवश्रिया ।
ऋतुगणेन निषेवितुमादधे
भुवि पदं विपदन्तकृतं सताम् ।। ६.१ ।।

नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्
ससुरभिं सुरभिं सुमनोभरैः ।। ६.२ ।।

विलुलितालकसंहतिरामृशन्
मृगदृशां श्रमवारि ललाटजम् ।

DRAFT

Draft Copy



तनुतरङ्गततिं सरसां दलत् -
कुवलयं वलयन्मरुदाववौ ।। ६.३ ।।

तुलयति स्म विलोचनतारकाः
कुरबकस्तबकव्यतिषङ्गिणि ।
गुणवदाश्रयलब्धगुणोदये
मलिनिमाऽलिनि माधवयोषिताम् ।। ६.४ ।।

### सूचनाग्रन्थाः।


1. **कुवलयानन्दः**, R.S.Vadhyar & Sons, Kalpathi, Palaghat, 2011, pp147.
2. **कालिदाससर्वस्वम्।** Dr. N.P. Unni, (Vol-1), New Bharatiya Book Corporation, Delhi, India, 2012, pp697.
3. **शिशुपालवधमहाकाव्यम् - महाकविमाघः, चौखम्बा संस्कृतभवन्, वाराणसी**.pp 1936.
4. **श्रीकृष्णकर्णामृतम् -लीलाशुकः / विल्वमङ्गलं स्वामियार्, शान्ता बुक् स्टाल्, गुरुवायूर्**, 1997, pp172.
5. **कालिदाससर्वस्वम् -परिभाषा -विष्णुनारायणन् नम्पूतिरि।**
6. പുഷ്പവാടിക, കുമാരനാശാൻ, കുമാരനാശാന്റെ സമ്പൂർണകൃതികൾ, പ്രസാധകർ -കുമാരനാശാൻ ദേശീയ സാംസ്കാരിക ഇന്സ്റ്റിറ്റ്യൂട്ട്, തിരുവനന്തപുരം.
7. ഭഗവദ്ഗീതാ-യഥാരൂപം, ഭക്തിവേദാന്തബുക് ട്രസ്റ്റ്, തിരുവനന്തപുരം, 1996, pp 683+.


⊙ ⊙ ⊙ ⊙

DRAFT

Draft Copy

## एककानुसारी मूल्यनिर्णयः।

**1) यथोचितं योजयत।**

| | |
|---|---|
| अ) दैत्यारिः | मीनः। |
| आ) मत्स्यः | अकः सवर्णे दीर्घः। |
| इ) तत्रैव | ल्यबन्तमव्ययम्। |
| ई) आगत्य | वृद्धिरेचि। |
| | आद्गुणः। |

**2) सूत्रार्थं विशदयत।**

**क)** उरण् रपरः।  **ख)** इको यणचि ।  **ग)** आद्गुणः।

**3) वसन्ततिलकं लक्ष्यलक्षणसमन्वयपूर्वकं लिखत।**

**4) अधोदत्तश्लोकभागे कः अलङ्कारः इति लक्षणसमन्वयपूर्वकं लिखत।**

कुर्वन्त्यशोका हृदयं सशोकम्।

**5) प्रदत्तसूचनानुसारं वसन्तकालवर्णनामधिकृत्य लघूपन्यासं लिखत।**

**सूचनाः** – कालिदासः – ऋतुसंहारम् - ऋतूनां वर्णनम् - वसन्तकालवर्णना - आमूलतः विद्रुमरागताम्रं - मत्तैः भ्रमरैः परिचुम्बितपुष्पैः – कुरबकद्रुममञ्जरीणां शोभां - भूमिः रक्तवसना नववधूरिव।

DRAFT